## अध्याय :- ११ Chapter-11

कूर्म उवाच ।।[१]

शांडिल्य इति विख्यातः पुराहमभवं द्विजः ।।
बाल भावे मया भूप कीडमानेन निर्मितम् ।। १

पुरा प्रावृषि पांशूत्थं शिवायतनमुच्छ्रितम् ।।
जलार्दवालुकाप्रायं प्रांशुप्राकारशोभितम् ।। २

पंचायतनविन्यासमनोहरतरं नृप ।।
विनायकशिवा[२]सूर्यमधुसूदनमूर्तिमत् ।। ३

पीतमृत्स्वर्णकलशं ध्वजमाला विभूषितम् ।।
काष्ठौ[३]तोरण विन्यस्तं दोलकेन विभूषितम् ।। ४

द्रढप्रांशुसमुद्भूत सोपानश्रेणि भासुरम् ।।
सर्वाश्चर्यमयं दिव्यं वयस्यैः संवृतेन मे ।। ५

तत्र जागेश्वरं लिंगं कृत्वाथ विनिवेशितम् ।।
बालयादुपलरूपं तद्वर्षावारिविशुद्धिमत् ।। ६

बकपुष्पैस्तथान्यैश्च केदारोत्थैः समाहृतैः ।।
[४]कौमलैरपरैः[५] पुष्पैर्वृतिवल्लीसमुद्भवैः ।। ७

---

१ ब. कूर्म उ० ।।

२ अ. सूर्य

३ अ. काष्ट

४ अ. ब. कमलै

५ ब परी

कूष्मांडैश्चैव वणाधिरून्मत्त कुसुमायुतैः ।।
मंदारै र्बिलवपत्रैश्च दूर्वादिधैश्च नवांकुरैः ।। ८

पूजा विरचिता रम्या शंभोरिति मयानृप ।।
ततस्तांडवमारबृधमनऽपेक्षितसत्क्रियम् ।। ९

शिवस्य पुरतो बालयो[१]द्रितं च स्वरवर्जितम् ।।
अकार्ष सकृदेवाहं बाल्ये [२]शिशुगणावृतः ।। १०

ततो मृतोऽहं जातश्च विप्रो जातिस्मरोनृप ।।
वैदिशे नगरेऽकार्षं शिवपूजां विशेषतः ।। ११

शिवदीक्षामुपागम्यानुगृहीतः शिवागमैः ।।
शिवप्रासाद [३]आधाय लिंगंश्रद्धा समन्वितः ।। १२

कल्पकोटिं वसेत्स्वर्गे यः करोति शिवालयम् ।।
यावंति परमाणूनि शिवस्यातने नृपे[४] ।। १३

भवंति तावद्वर्षाणि कारकः शिवसद्मनि।।
इति पौराणवाक्यानि स्मरञ्छीलं[५] शिवालयम् ।। १४

---

१ ब. बाल्य

२ अ. ब. शिशु

३ ब. माधाय

४ अ. ब्र. नृपः

५ ब. स्मरनृशीलं

[1]आकारिष्यामहं रम्यं विश्वकर्म-विधानतः ।।
मृन्मयं काष्ठनिष्पन्नं पार्क्वेष्टं शैलमेव वा[2] ।। १५

कृतमायतनं दद्यात्क्रमाद्दश गुणं फलम् ।।
[3] भस्मसायी त्रिषवणो भिक्षान्नकृत भोजनः ।। १६

जटाधरस्त पर्युषि शिवाराधनतत्परः ।।
इत्थं मे कुर्वतो जातं पुनर्भूप प्रमापणम्[4] ।। १७

जातो जाति स्मरस्तत्र तृतीयेहं भवांतरे ।।
सार्वभौमो महीपालः प्रतिष्ठाने पुरोत्तमे ।। १८

जयस्त इति ख्यातः सूर्यवंश समुद्भवः ।।
ततो मया बहुविधाः प्रासादा[5]कारिता नृप ।। १९

तस्मिन्‌भवांतरे शंभोराराधन परेण च ।।
ततो निरूपिता जाता बृकपुष्प पुरस्सराः ।। २०

सौवर्णे राजतैरत्ननिर्मितैः कुसुमैनृप ।।
तथा विधेऽन्नदानादि करोमि नृपसत्तम् ।। २१

---

१ ब. अवकार्ष्ण
२ अ. "च" पाठः
३ अ. पुस्तके लुप्तम् । (भस्म ······भोजनः )
४ ब. प्रमारणं
५ अ. प्रासादाः

केवलं शिवलिंगानां पूजां पुष्पैः करोम्यहम् ।।
ततो मे भगवाञ्छंभुः[1] संतुष्टोऽथ वरं ददौ ।। २२

अजरामरतां राजंस्तेनैव वपुषावृतः ।।
ततस्तथाविधं प्राप्यानन्य साधारणं वरम् ।। २३

विचरामि महीमेतां मदांध इव वारणः ।।
शिवभक्तिं विहायाथ नृपोऽहं मदनातुरः ।। २४

प्रधर्षयितुमारब्धः स्त्रियः परपरिग्रहाः[2] ।।
आयुषस्तपसः कीर्तेस्तेजसो यशसः श्रियः ।। २५

विनाशकारणं मुख्यं परदारप्रधर्षणम् ।।
सकर्णः श्रुतिहीनोऽसौ पश्यन्नंधो वदञ्जडः ।। २६

अचेनश्चेतनावान्मुर्खो विद्वानपि स्फुटम् ।।
तदा भवति भूपाल पुरुषः क्षणमात्रतः ।। २७

यदैव हरिणाक्षीणां गोचरं याति चक्षुषाम् ।।
मृतस्य निरयेवासो जीवतश्चेश्वराद् भयम् ।। २८

---

१ ब. भगवान् शंभु
२ अ. ब. परिग्रहे

एवं लोकद्वयं हंत्री[1] परदार प्रघर्षणा[2] ।।
जरामरणहीनोहमिति निश्चयमास्थितः ।। २९

एहिकामुष्मिकभयं विहायाहं ततः परम् ।।
प्रघर्षयितुमारब्धस्तदा भूप परस्त्रियः ।। ३०

अथ मां संपरिज्ञाय मर्यादारहितं यमः ।।
वरप्रदानशीशस्य तंदति कमुपायमैयौ ।। ३१

यम उवाच ।।[3]
नाहं तवानुभावेन गुप्तस्यास्य विनिग्रहम् ।। ३२

शक्रोमिपापीनो देव मन्नियोगो/न्यमादिश ।।
जगदाधाररूपा हि त्वमेशोक्ताः प्रतिव्रताः ।। ३३

गावो विप्राः सनिगमा अलुब्धा दानशीलिनः ।।
सत्यनिष्ठा इति स्वामिंस्तेषां मुख्यतमाससती ।। ३४

तास्तेन घर्षिता लुप्तं मदीयं धर्मशासनम् ।।
वरदान प्रमत्तेन तवैव परिभूयमाम् ।। ३५

---

१ अ. हर
२ अ. प्रघर्षणं
३ अ. ब. नष्टाः शब्दाः ।

जयदत्तेन[१] देवेश प्रतिष्ठानाधिवासिना ।।
इमां धर्मस्य भगवान्गिरमाकर्ण्य कोपितः ।।
शशाप मां समानीय वेपमानं कृतांजलिम् ।। ३६

ईश्वर उवाच ।।
यस्माद्दुष्ट समाचार धर्षितास्ते पतिव्रताः ।। ३७

कामार्तेन मया शप्तस्तस्मात्कूर्मः क्षणाद्भव ।।
ततः प्रणम्य विज्ञप्तः [२]शापतापहरो मया ।। ३८

प्राह षाष्टितमे कल्पे विशापो भविता गणः ।।
मदीय इति संप्रोच्य जगामादर्शनं[३] शिवः[४] ।। ३९

अहं कूर्मस्तदा जातो दशयोजनविस्तृतः ।।
समुद्रसलिले नीतस्त्वयाहं यज्ञसाधने ।। ४०

पुरस्तद्धायजूकेन स्मरंस्त्व्चं बिभेमि ते ।।
दग्धस्त्वयाहं पृष्ठेत्रव्रणान्येतानि पश्य मे ।। ४१

चयनानि बहून्यत्र कल्पसूत्र विधानतः ।।
पृष्ठो परिकृतान्यासन्निंद्रद्युम्न तदा त्वया ।। ४२

---

१ अ. जयदंतेन
२ ब. शापां ----
३ अ. दर्शनै
४ अ. शिवम् ।।

भूयः[१] संतापिता यज्ञैः पृथिवी पृथिवीपते ।।
सुस्त्राव[२] सर्वतीर्थानां सारं सा भून्मही नदी ।। ४३

तस्यां च स्नानमात्रेण सर्वपापैः प्रमुच्यते ।।
ततो नैमित्तिके कस्मिन्नपि प्रलय आगतः ।। ४४

प्लवमानमिदं राजन्मानसं शतयोजनम् ।।
षाट् पंचासत्प्रमाणेन कल्पा ममपुरा नृप ।। ४५

व्यतीता इह चत्वारः शेषौमोक्षास्ततः परम् ।।
एवमायुरिदं दीर्घमेवं शापाच्च कूर्मता ।। ४६

ममाभूदीश्वरस्यैव सतीधर्मद्रुहो नृप ।।
ब्रूहि किं क्रियतां शत्रोरपि ते गृहगामिनः ।। ४७

मम पृष्ठिश्चिरं (श्चिव) भूप त्वया दग्धाग्निः पुरा ।।
३ अहं ज्वलंतीमिव तां पश्याम्यद्यापि सैंश्रिणा ।। ४८

४ इदं विमानमायातं त्वया कस्मान्निरा कृतम् ।।
देवदूत समायुक्तं भुंक्ष्व भोगान्निजार्जितान् ।। ४९

---

१ अ. ब. "भूयं" पाठः ।
२ ब. सुश्राव
३ - ४ अ. प्रत्री इत्यंय श्लोकाः नास्ति ।

इंद्रद्युम्न उवाच ।।
चतुर्मुखिन[1] तेनाहं स्वर्गान्निर्वर्तितः स्वयम् ।।
विलक्ष्यो न प्रयास्यामि पाताधिकयाद्विषिते ।। ५०

तस्माद्विवेक वैराग्यम् विद्यापापनाशनम् ।।
आलिंग्याहं यतिष्यामि प्राप्य बोधं विमुक्तये ।। ५१

तन्मे गृहागतस्याद्य यथातिथ्यकरो भवान् ।।
तदादिश यथाऽपारपारदः कोऽपि मे गुरुः ।। ५२

कूर्म उवाच ।।
लोमशोनाम दीर्घायुर्मत्तोऽप्यस्ति महामुनिः ।।
मया कलापग्रामे स पूर्वं[2] दृष्टः क्वचिन्नृप ।। ५३

इंद्रद्युम्न उवाच ।।
तस्मादागच्छ गच्छामस्तमेव सहितावयम् ।।
प्राहुः पूततमां तीर्थादपि सत्संगतिं बुधाः ।। ५४
इत्थं निशम्य नृपतेर्वचनं ।।
तदानीं सर्वेऽपि ते च्याऽथ तें मुनिमुख्यमाशु ।।
चित्ते विधाय मुदिताः[3] प्रययुर्द्विजेंद्रं जिज्ञासवः
सुचिरजीवित हेतुमस्य ।। ५५

---

[4] इति श्री स्कांदे ...... महीप्रादुर्भावे कूर्माख्यानं नामैकादशोऽध्यायः ।।

---

१ ब. चतुर्मुखिण २ ब. पूर्वं
३ ब. "बहुधाः" पाठः ।
४ अ. इति श्री स्कंद पुराणे कुमारिकाखंडे कूर्माख्यानं महीप्रादुर्भावःसमाप्त
ब. इति श्री स्कंद पुराणे कूर्माख्यानं नाम एकादशोध्यायः ।। ११